O/C

**S-III/5/2231A/21**

**षष्ठसत्रार्द्धम्**

**पञ्चमपत्रम्**

**अद्वैतवेदान्तः**

**पूर्णाङ्काः 80**

**समयः घण्टात्रयम्**

**(15×2=30)**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।**

1. दृष्टार्थापत्तेः उदाहरणमेकं दर्शयत।
2. पृथिवी इतरेभ्यो भिद्यते इति ज्ञाने करणं किम्?
3. इन्द्रियस्य अभावज्ञानहेतुत्वं कुतो नास्ति?

**अथवा**

सिद्धान्ते कुत्र अन्यथाख्यातिः अङ्गीक्रियते?

4. ध्वंसः कदा नश्यति?
5. सोपाधिकभेदस्य किं लक्षणम्?

**अथवा**

किं नाम प्रामाण्यम्?

6. केषां पारमार्थिकतत्त्वावेदकत्वलक्षणं प्रामाण्यम्?
7. के अपृथक्त्वेऽपि चैतन्यात् पृथगिव अवभासन्ते?
8. ब्रह्मणः उपादानगोचरापरोक्षज्ञानसद्भावः कया श्रुत्या ज्ञायते?
9. ब्रह्मणः जगदुपादानत्वं कीदृशम्?
10. मिलितैः सत्त्वगुणोपेतैः भूतैः कानि उत्पद्यन्ते?

**अथवा**

परलोकयात्रानिर्वाहकशरीरं किम्?

11. कस्य सृष्टौ परमेश्वरस्य साक्षात् कर्तृत्वम्?
12. निर्गुणप्रकरणपठितानां सगुणवाक्यानां कथं विनियोगः?

P.T.O.

13. का श्रुतिः जीवस्य स्वप्रकाशत्वं वदति ?

**अथवा**

सातिशयं सुखं किम् ?

14. कया श्रुत्या दर्शनोद्देशेन श्रवणादीनि विहितानि ?

**अथवा**

का नाम तितिक्षा ?

15. ज्ञानोत्पत्तौ कानि कर्माणि क्षीयन्ते ?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** (5×6=30)

16. अर्थापत्तिप्रभेदान् सोदाहरणं विशदयत।

17. प्रामाण्यं स्वत एव उत्पद्यत इति साधयत।

**अथवा**

ब्रह्मणः द्विविधं लक्षणम् उपपादयत।

18. सृष्टिवाक्यानां तात्पर्यं कुत्र इति विचारयत।

**अथवा**

नैमित्तिकप्राकृतिकप्रलयौ विवेचयत।

19. 'तत्त्वमसि' वाक्यार्थं वर्णयत।

**अथवा**

ब्रह्मसाक्षात्कारे करणं किमिति विचारयत।

20. मननिदिध्यासनयोः श्रवणाङ्गत्वं न तार्तीयशेषत्वरूपम् इति साधयत।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** (1×20=20)

21. सोदाहरणम् अनुपलब्धिप्रमाणं निरूपयत।

**अथवा**

ग्रन्थोक्तरीत्या जगत्सृष्टिं वर्णयत।

**अथवा**

अन्तःकरणवृत्तेः प्रयोजनं निरूपयत।